॥ धर्मे नास्ति भयं क्वचित् ॥

॥ श्रीमन्महामन्दिराखण्ड-हरिमय-विद्वद्गुरुपरम्परायै नमः ॥

जगद्गुरु-श्रीमद्-वल्लभाचार्य-विद्यालक्ष्मी-संवर्धन-सङ्कल्पः

श्रीकृष्णचन्द्राष्टकम्

(श्रीगङ्गाराम-तनय-श्रीकेवलराम-विरचितम्)

* *प्रकाशकम्* *

श्रीगोवर्धनेश-प्रकाशन-मण्डलम्

(मुम्बापुरी)

॥ श्रीगोपीजनवल्लभाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

जगद्गुरु-श्रीमद्-वल्लभाचार्य-विद्यालक्ष्मी-संवर्धन-सङ्कल्पः

जगद्गुरु-श्रीमद्-वल्लभाचार्य-वंशावतंसानां

पू. पा. गो. १०८ श्रीअनिरुद्धलाल-महाराजानाम्

आज्ञया प्रकाशितम्

श्रीकृष्णचन्द्राष्टकम्

(श्रीगङ्गाराम-तनय-श्रीकेवलराम-विरचितम्)

विशेषानुग्रहः

जगद्गुरु-श्रीमद्-वल्लभाचार्य-वंशावतंसाः पण्डितप्रकाण्डाः

पू. पा. गो. १०८ श्रीश्याममनोहर-महाराजाः

(पार्ला-किशनगढ़)

प्रकाशकम् :- श्रीगोवर्धनेश-प्रकाशन-मण्डलम् (मुम्बापुरी)

प्रथमसंस्करणम् : श्रीवल्लभाब्दः ५२८ - वि. सं. २०६२ - 2005 A.D.

प्रति-संख्या : १०००

निःशुल्कवितरणार्थम्

सम्पादकः : गोस्वामी गोकुलनाथः (मन्दारकुमारः), बृहन्मन्दिरम्

Śrīkṛṣṇacandrāṣṭakam of Shri Kevalaram Ojha :
published for the first time on the basis of an old
manuscript from Mota Mandir-Mumbai, India.

पत्रप्रेषणसङ्केतः :-

Shri Govardhanesh Prakashan Mandal

Administrator : Shri Bipinbhai Shah
Shop No. 41, 1st Bhoiwada,
H. H. Shri Gokulnathji Maharaj Lane,
Mumbai - 400 002.
Ph. : (022) 2242 1456 • Telefax : (022) 2242 1492
email : vedagaana@yahoo.com

मुद्रकः

Creative Compugraphics

Nathalal Bhuvan, 3rd Floor,
133, V. P. Road, Mumbai - 4.
Ph. : (022) 2385 9603
www.geocities.com/utsava_02
email : ccg_nik@yahoo.com

अस्ति किञ्चित् वक्तव्यम्।

श्रीगङ्गाराम-तनय-श्रीकेवलराम-विरचितं श्रीकृष्णचन्द्राष्टकं गीर्वाण-भारती-रसिकानां कृते निश्चयेन अमृतकलश इव आह्लादजनकं भविष्यति। अतः अतिप्राचीना अद्ययावत् अप्रकाशिता विद्याभण्डार-स्थिता एषा लघुरचना स्वतन्त्र-कलेवरेण प्रकाशनीया, एतादृशी भावना मनसि दृढीभूता। परममनोहर-प्रसन्न-शैल्यां मालिनीच्छन्दसि ग्रथिता एषा कृतिः कस्मै संस्कृतप्रेमिजनाय न रोचिष्यते? श्रीकेवलरामस्य सरला विद्वन्मनस्सन्तोषावहा च रचनाशैली निश्चयेन द्योतयति यद् अस्य विदुषः एकाधिकाः रचनाः भवेयुः, नात्र सन्देहावसरः।

एषा चर्चा तु कवेः केवलरामस्य। अधुना भक्त-केवलरामस्य विषये एकं तथ्यं दृष्टिपथम् आगच्छति। ग्रन्थस्य पुष्पिकां दृष्ट्वा वयं ज्ञातुं शक्नुमः यद् एषः महोदयः यतिपुरास्थित-श्रीमद्गोवर्धनाद्रिनिकटवर्तिनः-अस्माकम् प्रसिद्धस्य अतिप्राचीन-मूलस्थानस्य सेवकः आसीत्।

बृहन्मन्दिरस्थ-समृद्ध-विद्याभण्डारतः प्राप्ता श्रीकृष्णचन्द्राष्टक-पाण्डुलिपिः अधुना ग्रन्थरूपेण प्रकाश्यते इति सर्वेषां कृते महोत्सव एव। अत्र मूल-श्रीकृष्णचन्द्राष्टकस्य यथावदवबोधनाय उपोद्बलक-संस्कृत-सरलार्थः अस्माभिः योज्यते।

अस्मिन् कार्ये संप्रवृत्तेभ्यः सर्वेभ्यः धन्यवादाः। श्रीगिरिश बी. जानी-महोदयाय थत्तेकुलोत्पन्न-श्रीमोहन-महोदयाय च शुभाशीर्वादाः।

इति शम्।

- गोकुलनाथः

* श्रीवल्लभवंशावतंस-श्रीमत्काकावल्लभ-प्रपौत्रस्य श्रीमद्गोकुलनाथ(घोटावाले)-पौत्रस्य श्रीमन्मथुरानाथात्मजस्य श्रीमद्गोवर्धनेशाग्रजस्य वेरावलगृहाधीशस्य श्रीमद्गोकुलनाथस्य सेवकः श्रीकेवलरामः।

श्रीवल्लभ-वंशवृक्षः

प्रथम / ६ गृह मुंबई (बड़ा मन्दिर)



(श्रीवल्लभ-वंशवृक्ष-ग्रन्थे पृ. ६)

॥ श्रीकृष्णाय नमः ॥

॥ श्रीकृष्णचन्द्राष्टकम् ॥

वनभुवि विहरन्तौ तच्छविं वर्णयन्तौ
सुहृदमनुसरन्तौ दुर्हृदं सूदयन्तौ ॥
उपयमुनमजन्तौ वेणुनादं सृजन्तौ
भज हृदय हसन्तौ रामकृष्णौ लसन्तौ ॥१॥

हे **हृदय ! रामकृष्णौ** बलराम-कृष्णचन्द्रौ, **भज** सेवस्व । कीदृशौ च तौ रामकृष्णौ? **हसन्तौ** हास्यं कुर्वन्तौ, **लसन्तौ** खेलन्तौ, **वनभुवि** अरण्यप्रदेशे, **विहरन्तौ** लीलया अटन्तौ, **तच्छविं** वनशोभां, **वर्णयन्तौ** प्रशंसन्तौ, **सुहृदं** सखिजनं भक्तजनं च, **अनुसरन्तौ** अनुयान्तौ, **दुर्हृदं** शत्रुं दुष्टं वा, **सूदयन्तौ** नाशयन्तौ, **उपयमुनं** यमुनासमीपं यमुनातटे, **अजन्तौ** विहरन्तौ धावन्तौ वा, **वेणुनादं सृजन्तौ** वंशं वादयन्तौ इति, तादृशौ **रामकृष्णौ, हे हृदय ! भज**।

हे हृदय ! भगवतोः श्रीकृष्णबलरामयोः सेवां विधेहि। भगवन्तौ तौ हास्य-क्रीडा-विहार-परायणौ वनश्रियं वर्णयतः। तौ च भक्तान् अनुसरतः, शत्रून् च विनाशयतः। वंशीनादकारिणौ तौ यमुनातटे विहारं कुरुतः ।।१ ।।

कलयसि भवरीतिं नैव चेद्भूरिभीतिं
यमकृतनिगृहीतिं तर्हि कृत्वा विनीतिम् ।।
जहिहि मुहुरनीतिं जायमानप्रतीतिं
कुरु मधुरिपुगीतिं रे मनो मान्यगीतिम् ।।२।।

रे **मनः** मानस ! यदि त्वं सम्यक्प्रकारेण **भवरीतिं** संसारप्रणालीं, **नैव कलयसि** न हि जानासि, **चेत्, तर्हि भूरिभीतिं यमकृतनिगृहीतिं** बहुभययुतां मृत्युदेवविहितबन्धनपीडां, **कलयसि** प्राप्नोषि। अतः **विनीतिं कृत्वा** विनयं वाऽनुनयं विधाय, **मुहुः** निरन्तरम्, **अनीतिं** दुर्व्यवहरणं, **जहिहि** त्यज। **जायमानप्रतीतिं** जायमाना प्रतीतिः भगवदनुभूतिः यस्यां सा तादृशीं, **मान्यगीतिं** समादरणीयगीतिकां, **मधुरिपुगीतिं** मधसूदनस्य श्रीहरेः श्रीपूर्णपुरुषोत्तमस्य श्रीकृष्णस्य गीतिं गुणगानं, कुरु विधेहि।

हे चित्त ! यदि त्वं सम्यक्तया संसारपद्धतिं नाऽवगच्छसि तर्हि भयङ्कर-यमयातनां प्राप्स्यसि। अतः विनयमवलम्ब्य दुर्नीतिं परित्यज। भगवदनुभूतिकारिण्याः प्रभुस्तुतेः गायनं च कुरुष्व ।।२ ।।

द्विपपरिवृढदन्तं यः समुत्पाट्य सान्तं
सदसि परिभवन्तं लीलया हन्त सन्तम् ॥
स्वजनमसुखयन्तं कंसमाराद्भ्रमन्तं
सकलहृदि वसन्तं चिन्तयामि प्रभुं तम् ॥३॥

यः श्रीकृष्णः, **द्विपपरिवृढदन्तं** गजराजस्य कुवलयापीडनाम्नः, **दन्तं** रदनं, **सान्तं** समूलम्, **उत्पाट्य** उन्मूल्य, **सदसि** सभायां, **लीलया** क्रीडयैव मनोरञ्जनरूपेणैव वा, **हन्त** विस्मयस्यायं विषय इत्यर्थकोद्गारः, **सन्तं** सज्जनं सज्जनसमुदायमित्यर्थः, **परिभवन्तम्** अवमानयन्तं, तथा च **स्वजनं** निजकुटुम्बिप्रजाजनम्, **असुखयन्तं** पीडयन्तं, **कंसं** कंसाख्यं शत्रुभूतं स्वमातुलम्, **आरात्** तस्य समीपमेव, तस्य विनाशार्थं **भ्रमन्तम्** अभिक्रामन्तं, **सकलहृदि** सर्वजनहृदये, **वसन्तं** स्थितं, तं तथोक्तं भगवन्तं श्रीकृष्णं, **चिन्तयामि** ध्यायामि।

भगवान् श्रीकृष्णः कुवलयापीडनामकगजस्य दन्तं समूलम् उन्मूलयामास। सज्जनसमुदायं स्वकुटुम्बिजनान् च पीडयन्तं कंसं श्रीकृष्णः मारयामास। तादृशं सकलजनहृदयनिवासिनं श्रीकृष्णम् अहं ध्यायामि ।।३ ।।

करधृतनवनीतः स्तेयतस्तस्य भीतः
पशुपगणपरीतः श्रीयशोदागृहीतः ।।
निखिलनिगमगीतः कालमायाद्यभीतः
कनकसदुपवीतः श्रीशुकादिप्रतीतः ।।४ ।।

कीदृशश्चासौ प्रभुः श्रीकृष्णः ध्यानविषयः? **करधृतनवनीतः** पाणिगृहीतहैयङ्गवीनः, **तस्य** नवनीतस्य, **स्तेयतः** चौर्यकर्मतः, **भीतः** भयाकुलः, **पशुपगणपरीतः** गोपालवृन्दसमावृतः, **श्रीयशोदागृहीतः** स्वमातृ-यशोदाविधृतः, **निखिलनिगमगीतः** सकलवेदनिरूपितयशोगानः, **कालमायाद्यभीतः** कालदेवात् मृत्योः मायादिभ्यः अभीतः भीतिं नैवापन्नः स्वस्यैव कालमायानियामकत्वाद् अनाकुलः इत्यर्थः, **कनकसदुपवीतः** सुवर्णयज्ञसूत्रः, **श्रीशुकादिप्रतीतः** श्रीशुकदेवादिसमनुभूतस्वरूपः, भगवान् श्रीकृष्णः ध्येयः।

गोपालवृन्दसमावृतः, नवनीतचौरः, तच्चौर्यकर्मभीतः, श्रीयशोदामातृनिगृहीतः भगवान् श्रीकृष्णः एव सकलवेदवाङ्मयस्य प्रतिपाद्यविषयः वर्तते। काल-मायादिभिः परः सुवर्णोपवीतधारी प्रभुः नन्दनन्दनः पुरा शुकदेवादिभिः साक्षात्कृतः। स एव चास्माभिः ध्येयः ॥४॥

सकलजननियन्ता गोसमूहानुगन्ता
व्रजविलसदनन्ताभीरगेहेषु रन्ता ॥
असुरनिकरहन्ता शक्रयागावमन्ता
जयति विजयियन्ता वेदमार्गाभिमन्ता ॥५॥

सकलजननियन्ता सर्वलोकनियामकः, **गोसमूहानुगन्ता** धेनुवृन्दानुगामी, **व्रजविलसदनन्ताभीरगेहेषु रन्ता** व्रजधामनिवास्यनेकगोपालगृहेषु रममाणः, **असुरनिकरहन्ता** राक्षससमूहविनाशकः, **शक्रयागावमन्ता** इन्द्रयज्ञतिरस्कर्ता, **विजयियन्ता** विजेतृनियामकः, **वेदमार्गाभिमन्ता** वैदिकसरण्यनुमोदकः, परब्रह्म श्रीकृष्णचन्द्रप्रभुः **जयति** विजयते ।

सकललोकनियन्त्रकः, गोगणानुगामी, व्रजवासिसदनविहारी, असुरविनाशकः, इन्द्रयागतिरस्कारी, विजयशीलानां नियन्ता, वैदिकमार्गानुमोदकः भगवान् श्रीकृष्णः विजयते ।।५।।

सुकृतिविहितसेवो निर्जितानेकदेवो
भवविधिकृतसेवः प्रीणिताशेषदेवः ॥
स्म नयति वसुदेवो गोकुलं यं मुदे वो
भवतु स यदुदेवः सर्वदा वासुदेवः ॥६॥

सुकृतिविहितसेवः पुण्यशालिकृतसमाराधनः, **निर्जितानेकदेवः** स्वमहिमातिशयेन पराजितनैकदेवताकः, **भवविधिकृतसेवः** शङ्करब्रह्मदेवसेवितः, **प्रीणिताशेषदेवः** प्रसादिताखिलदेवतासमुदायः, यः प्रभुश्रीकृष्णः **यं वसुदेवः** कृष्णजनकः, **गोकुलं** गोकुलग्रामं, **नयति स्म** अनयत्, **सः** तथोक्तः प्रख्यातः, **वासुदेवः** वसुदेवसुतः सर्वव्यापिदेवः अखिलब्रह्माण्डनायकः, **यदुदेवः** यदुनाथः यदुनन्दनः श्रीकृष्णः, **सर्वदा** नित्यं, **वः** युष्माकं, **मुदे** आनन्दाय, **भवतु** अस्तु, भवतां कृते सः मोदप्रदायको भवत्वित्याशयः ।

पुण्यशालिजनसमाराधितः, ब्रह्मशङ्करादिदेवसेवितः, स्वप्रभावपराजितनैकदेवः, सकलदेवता-प्रसन्नताप्रदायकः भगवान् वासुदेवः श्रीकृष्णः, यं तज्जनकः वसुदेवः मथुरातः गोकुलं निनाय, सः यदुपतिः श्रीकृष्णः युष्माकं सर्वेषां कृते आनन्दप्रदायकः भवतु ।।६ ।।

करकजधृतशैले प्रोल्लसत्पीतचैले
रुचिरनवघनाभे शोभने पद्मनाभे ॥
विकचकुसुमपुञ्जे शोभमाने निकुञ्जे
स्थितवति कुरु चेतः प्रीतिमन्यत्र नेतः ॥७॥

हे **चेतः** चित्त ! **करकजधृतशैले** पाणिपङ्कजसमुत्तोलितगिरिवरे, **प्रोल्लसत्पीतचैले** शोभमानपीताम्बरे, **रुचिरनवघनाभे** मनोहरनूत्नकृष्णपयोदकान्तौ, **शोभने** मनोहरे चित्ताकर्षके, **पद्मनाभे** श्रीकृष्णे, **विकचकुसुमपुञ्जे** प्रफुल्लपुष्पनिकरे, **शोभमाने** विलसति, **निकुञ्जे** लतामण्डपे, **स्थितवति** विराजमाने सति, **इतः** अस्मात्, **अन्यत्र** स्थलान्तरे, **प्रीतिं** प्रेम, **न करु** मा विधेहि ।

हे चित्त ! श्रीगिरिवरधारी, समुज्वलपीताम्बरः, सुन्दरघनश्यामः, मनोहरः, श्रीकृष्णप्रभुः, अत्र प्रफुल्लितपुष्पशोभितलतामण्डपे विराजते, तर्हि एनं विहाय अन्यस्मिन् स्थले प्रेमबन्धनं नैव विधेहि ।।७।।

विषयविरचिताशे प्राप्तसंसारपाशेऽ-
नवगतनिजरूपे सृष्टकर्मण्यपूपे ॥
सुकृतकृतिविहीने श्रीहरे भक्तिहीने
मयि कृपय समन्तौ केवले दीनजन्तौ ॥८॥

श्रीहरे ! हे श्रीकृष्ण !, **मयि कृपय**, कीदृशे मयि? **विषयविरचिताशे** विषयवासनाविहितनानाभिलाषे, **प्राप्तसंसारपाशे** लब्ध-संसृतिबन्धने, **अनवगतनिजरूपे** विस्मृतमूलस्वरूपे, **सृष्टकर्मण्यपूपे** निर्मितकर्मप्रवृत्तिजन्यभोगे, **सुकृतकृतिहीने** पुण्यकार्यरहिते, **भक्तिहीने** भजनरहिते, **समन्तौ** दोषपूर्ण, **दीनजन्तौ** पामरप्राणिनि, **केवले** केवलराम-नाम-धारिणि अस्मिन् जने, **मयि** अस्मिन् जने, हे प्रभो ! **कृपय** दयस्व ।

हे प्रभो ! अहं विषयवासनारचितनानाभिलाषः, संसारबन्धननिगडितः, विस्मृतनिजमूलस्वरूपः, पुण्यहीनः, स्वकर्मजन्यभोगनिमग्नः, भक्तिहीनः, दोषपूर्णः, दीनप्राणी अस्मि। एतादृशे मयि कृपां कुरु ॥८॥

इतिश्रीमत्सकलाचार्यशिरोमणिश्रीवल्लभाचार्यकुलकमलप्रभाकरगोस्वामिश्रीमथुरानाथात्मज-
श्रीगोकुलनाथचरणपङ्केरुहरेणुसंशोभिताललाटद्विजवरश्रीमालिज्ञातिसमुत्पन्नौझावटङ्क-
श्रीगङ्गारामतनयकेवलरामविरचितं श्रीकृष्णचन्द्राष्टकम् ।।

वेदवेदेभचन्द्रेऽब्दे (१८४४) माधवे सप्तमीकुजे ।
शुक्ले पक्षे तुर्ययामे दिनस्याजनि चाष्टकम् ।।

गुरुचरणाज्ञानुवर्तिनः 'श्रीप्रबोध शाह'-श्रेष्ठिनः श्रीवल्लभकुलोद्भव-महानुभाव-चरणेषु
साष्टाङ्गदण्डवत्प्रणामाः ।